M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.

No. Ser. 1018

Title: Garbha Prayaschit

1018

Complete

Gatbha Prayaschit : Title

Raghunath Suri : Author

: : : Editor

: : : Year, Vols.

: : : Publisher

1018 : : : Remarks

श्रीः

श्रीशंकरो जयतितराम्

श्रीः अथ कस्यचिद् ब्राह्मणनामधारकस्य ब्राह्मणस्यानुतप्तस्य स्वजनरूपाया ब्राह्मण्या विदेशस्थपतिकाया अज्ञानकृदागमे भोत्पत्तिनिगमने किं प्रायश्चित्तमिति वि
विच्यते । धर्मशास्त्रे हि अष्टौ जातिभ्रंशकं पातकमुक्तं तत्प्रायश्चित्तं च पृथगुक्तं । तत्र नवैतन्महापातकं । ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः । एते महापातकिनो यश्चैतैः स
ह संवसेदित्यत्र गणनायामभावान्न तदुक्तं प्रायश्चित्तं । न चोपपातकसंसर्गकं पातकं महापातकतुल्यानि पापान्युक्तानि यानि तु । तानि पातकसंज्ञानि तन्न्यूनमुपपातकमि
ति स्मृत्युक्तं येन लिंगच्छेदादि तत्र निर्दिश्येत । न च जातिभ्रंशकरणादिपंचकेष्वविनिवेशः तस्यैतस्माद्भिन्नजातीयत्वादनुक्तत्वाच्च स्मार्तिकर्तॄ । तस्मात्तन्न्यूनमुपपातकमि
ति तृतीयकोटिविशिष्टोपपातकगणे पारदार्यं पारिवित्त्यं वा ... लवणक्रियेति पठितं पारदार्यस्योपपातकत्वं । ननु पारदार्ये पारदार्यपदेनोपवनितायां गुरुतल्पत्वम
मानामपि पारदार्यत्वापत्तिरितिवाच्यं । तल्लक्षणे गुरुतल्पतत्समव्यतिरिक्तपरदारपरतया व्याख्यानेनोक्तत्वात् । पारदार्यस्यापि श्रोत्रियाश्रोत्रियपत्नीत्वगुणवत्त्वागुण
वत्त्वादिस्फारतरभेदवशान्नैकविध्येऽपि प्रकृतविषय एव प्रायश्चित्तं निश्चीयते । द्वे परदारे इति श्रोत्रियस्योपपातकेषु वैश्यमिति गौतमीयवचसोन्नीते का ... व्रतं युक्तं
न चैतस्य नवनस्य कां व्यवस्थेति शंक्यं । सत्तु काले कामतो जातिमात्रब्राह्मणीगमने वार्षिकं प्राकृतं ब्रह्मचर्यं । तस्मिन्नेव साधनसादिगुणशालिन्यां ब्राह्मण्यां गमने द्वै
वर्षं प्राकृतं ब्रह्मचर्यं । नातः श्यामे वश्रोत्रियभार्यायां गमने त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यमिति मिताक्षरायां व्यवस्थापनात् । प्राकृतं ब्रह्मचर्यं नाम गुरुतल्पे प्रकरणोक्तमेका
दिकं व्रतं । तदत्याभ्यासिके अत्यभ्यासे तु षड्गुणमिति षाड्गुण्यं गमने तु व्रतं यत्स्यात् द्वैतद्द्विगुणं भवेदिति नियमात् द्वादशाब्दिकं सिद्धं । तस्या एव गुणाधिक्यादिग
वषणे तु ततोऽप्यधिकमेव स्यात् । एतेन ब्राह्मणनादिरहस्यतरार्थपर्यालोचनायां तु ततोऽप्यधिकमेव स्यात् । विधेः प्राथमिकाद्यस्माद्द्वितीये द्विगुणं भवेत् । तृतीये त्रिगुणं
प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति स्मृत्यर्थसमाम्नानेनैतस्या एवं विपत्रि चतुर्थी गर्भोद्भवा ... कथा श्रवणेन त्वत्यधिकतममेव निष्पद्येत । न च उपपातकशु
द्धिः स्याद्वेवं चान्द्रायणेन वा । पयसा वापि मासेन पराकेणाथवा पुनरिति याज्ञवल्क्यीयवचनतस्तु यविरोधः शंक्यः । तत्त्वनुक्तोपपातकद्रुमच्छेदादिपरतया योज
नीयमिति वचनान्तरविषयव्यवस्थया वागम्यते । कथमन्यथा विप्रा मस्वजनांगत्वा प्राजापत्यं समाचरेदिति संवर्तवचं ... पृथग्गोधाश्रीसाध्वीवर्णानामपि ।
कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य चेति यमोक्तं कृच्छ्रद्वयप्रतिपादकं वचो यथा यथं व्यवस्थापयताविज्ञानेश्वरेण द्विजो ढ ... कन्यकादिपरतया कानि ... तद्धि
श्रिव्यभिचारसकृदसकृत्कामाकामादिरूपसंबंधमाश्रित्य योऽयं तालिखितानां स्मृत्यंतरवचसां योजना युज्यते । व्याघ्रोऽपि । ब्राह्मणो ब्राह्मणीं गच्छेद्कामां यदि
कामतः । कृच्छ्रं चान्द्रायणं कुर्यादर्धमेव प्रमादतः । अर्थमेव सकामायां तप्तकृच्छ्रं समन्ततो । अर्धमर्द्धं नपादीनां दारेषु ब्राह्मणश्चरेदिति स्मृतेः तदपि विप्रामस्व
जनांगत्वेत्यनेन समानविषयं । अत एव माधवारण्यैः अत्र प्रोक्तेषु सर्वेषु व्रतेषु गौरवलाघवे परीक्ष्य यथायथं बुद्धिपूर्वाभ्यासाभ्यासादिविषयत्वं योजनीयमिति
पूर्वापरवचनविसंवादावसरे दशमाध्याये अभिधायि । तस्माल्लिखितमेव प्रायश्चित्तं युक्तं । यत्तु मनुः परदारे पुत्रचेतनां चारये द्रुतमिति विशेषवचनीभूतमनुस्मरणा
तस्या अपि द्वादशाब्दमेव सामान्यतः सिद्धं । योषित्कृता परा येन न केवलं तस्या एव प्रायश्चित्तं । किंतु तत्त्यागिगृहस्यापि । पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते इति पराशरस्मरणात् । सुरां पिबेदित्युपलक्षणं । पापत्पातककारिणीति यावत् । नानुतप्तेतथा अगृहीतप्रायश्चित्ता यास्त्या
गमेवाप्यनुजज्ञे पराशरः । जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ । तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीमिति । सर्वस्याप्येतस्यार्थस्य पर्यवगम्यत्वात् ... द्विजैः तैरे
कैरपि तत्प्रायश्चित्तं न प्रायश्चित्तपदवाच्यमपि तु दोषमेव तद्द्विकुलीकरोति । अत एवोक्तं पराशरेण । गायत्र्याख्या दिसा विप्राः संध्योपास्त्यग्निकार्ययोः । अज्ञा
नोत्कृष्टिकर्तारो ब्राह्मणा नामधारकाः । अतऊर्ध्वं तु ये विप्राः केवलं नामधारकाः । परिषत्त्वं न तेष्वस्ति सहस्रगुणितेष्वपि । अतऊर्ध्वं वर्णितेषु परिषत्पक्षेषु अवग
म्यमानेभ्यो गुणवद्भ्यो ब्राह्मणेभ्यः ऊर्ध्वं तद्व्यतिरिक्ता गुणरहिता इति यावत् । यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः । ब्राह्मणस्त्वनधीयानस्त्रयस्ते नाम
धारकाः । ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः । यथा हुतमनग्नौ च अमंत्रो ब्राह्मणस्तथा । ब्रह्मबीजसमुत्पन्नो मंत्रकर्मविवर्जितः । जातिमात्रोप
जीवी यः स ब्राह्मण इति स्मृत इति नामधारकानुक्त्वा ब्राह्मणब्रुवादीनप्यभिधाय । अव्रतानाममंत्राणां जातिमात्रोपजीविनां । सहस्रशः समेतानां परिष
त्त्वं न विद्यत इति पर्षद्बहिर्भावमाख्यत् । एतादृशैः पिकदा चित्तं तत्प्रायश्चित्तं किं तर्हि स्यादिति । यद्दंतितन्नोपाय ... र्वा धर्ममतद्विदः । तत्पापं शतधा भूत्वा त
द्वक्तॄनधिगच्छति । यत्तु दत्तमज्ञानैः प्रायश्चित्तं सभागते । तत्पापं शतधा भूत्वा दातृनेव पतिष्यतीत्येन सोऽपि ह्यद्विमेवाह । न च मनुष्यसंभवे सत्यमनुष्य
त्वेन ... तदसंभवे त्वमनुष्यमपि लोकैर्गोक्रियते तद्वदयनादिसंपन्नब्राह्मणालाभे ब्राह्मणाभासानामपि परिषत्त्वं स्यादिति वाच्यं । यथा षण्ढोऽफ
... ... फलः । यथा ... फलं ... फलमिति ... ग्राम ... नामधारकब्राह्मण ब्राह्मण
... ... प्रायश्चित्तस्याफलत्वमेवाह । नामधारका द्विजा बहवोऽपि संतु ... ... नवृद्धं ... यथेति ... निराकरोति ।
प्रायश्चित्तं प्रयच्छंति ये द्विजा नामधारकाः । ते द्विजाः पापकर्माणः समेता नरकं यथुरिति । समेताः एकेनसंस्कृतेन संगताः पापुःपीतीत्यर्थः । अत्रांसा
या भरतवंशे तिभूतवन्निर्दूराः । यद्यपि संस्कृताः स्वयं नरकं नार्हति तं धाप्यन्नेह सोऽकस्यापरिषत्पद्वेशानां स्यापि नरकप्राप्तिः बहुविंशतिमतेऽपि ।
प्रायश्चित्तं प्रयच्छंति ब्राह्मणा नामधारकाः । ते सर्वे पापकर्माणः समेता नरकं व्रजेत् । समेता नामधारकैः संगताः । तावतैवापराधेन मध्यसंस्कृतोऽपि
नरकं प्राप्नोति । तस्मात्संस्कृतेनाप्येकेन द्वाभ्यां वा दत्तं प्रायश्चित्तं न द्रव्यार्ही ... योत्तविनिश्चयप्राप्तिसाधनमेव उपपादितवानरेति विधिप्रतिपादनात् ।
चातुर्वैद्यो विकल्पी च अंगविद्धर्मपाठकः । त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा । दशसंख्यावराः यस्यामसौ दशावरा पर्षत् । धर्मशास्त्रपाठरूप
वेदस्वरूपधरा द्विजाः । कीर्तितार्थमपि ये द्रूयुः स धर्मः परमः स्मृतः । तस्मात् प्रमाणमार्गमार्गतो ये धर्मं प्रवदंति वै । तेषां तु द्विजितपापं संस्कृतगुणवादिनामि
ति पर्षत्स्वरूपं तु ... कविंशति संख्याकैर्मीमांसान्यायपारगैः । वेदांतकुशलैश्च धर्मप्रायश्चित्तविदुरैः ये । तथा शोधनायोग्यो वापि वेदवंतोऽग्निहोत्रिणः । ब्राह्म
णानां समर्थायै परिवत्ताविधीयते । इति पर्षदुक्तमेव प्रायश्चित्तमेनः शोधकं । सकलमेतन्मिताक्षरापरार्कमाधवादिनिबंधकलापे रिङ्गीलयतां ... यथा
यातमेव । तस्मात्कृपितस्य बलालं कृतस्यैतस्य कस्यचिद्ब्राह्मणनामधारकस्य पश्चोपजातिस ... वस्यान्यैः सहस्राधिकैरपि तत्समैः कृपीगतारिवलसा
मादिगुणनिपुणैः प्रदत्तं प्रायश्चित्तपदवाच्यं कर्मोऽखिलपर्षन्निरयसंशोधकमेवेति सर्वमेतत्स्वकृतमनोविदा कुर्वंतु । तथान्यस्यापि दैवे कद्रावर्षपर्यंतमेवीद
मन्यदारान्निलापुकस्यलीलालालनेऽव शिलातलपातिततद्बालकवधजनितभ्रूणहत्यापापस्याप्ययं सन्न्यावेहाईवं नतया सा कृरिंसिषाच्य रतेऽनागोमावला

श्रीशायवनाथमवत्यतयासासैस्यदितिमनसिविधायतामादायाथमार्गेगितस्यदैवाद्ग्रामकण्टकप्रभृतिधर्मिणासंस्पर्शवादेनानुनीयपुनरानीतस्यैनामपहायपुनिरं
कुशांपरेतपतिकांकांदिदवलस्यैवानेहसंहयतःपापाचरवत्संज्ञातगर्भोपितांकाणाटिकाधिनोनराजास्तनावकाशकारानिवेशितव्योमकेशाभितत्प्रसादात्संसं
मार्जनीखंडेपदेनाभितकरापहारितखादिरन्नाराखासुपुमांनामपहायपुनरपिप्रथममेववरणीकुर्वतोमरणावधिनसंस्मृतापर्णारमणादिचरणचरणस्य
नारायणेतिसंज्ञानाबोधेपतस्यनकिंचिदपिशास्त्रीयंप्रायश्चित्तंदत्वाअभ्यासेहगुणाहद्दिर्मीताद्वाग्विधीयते॰ततोमासगुणावृद्धिर्यावत्संवत्सरंभवे
त्॰ततःसंवत्सरगुणायावत्सापंसमाचरेदितिप्रतिनिमित्तंनैमित्तिकावर्तनेनपक्षमपक्षमत।पिलोगाक्षिणाक्षिप्तसंक्षेपपक्षमपिनिराक्षिपत्तांपधाता
तदुपदिष्टयांचनिरर्गलंतत्संसर्गकारिणांपत्न्यादिपुकथंनिष्कृतिरितिमनसिविधायास्माभिश्रीत्रिलण्या।भिलापुकैरपांक्तीकृतानांपचोपजातिरख्याति
ख्यातानांपरयाम्यायांयस्तैःसहसंवसेदिति॰योयेनसंवसेदेषांसतस्यैवव्रतंचरेदित्यादिनिषेधादिभ्याडिम्भ्यैःसभ्यैर्नसंसर्गःकरणीयइतिसक
लभुवनैकांतमंडनीभूतान्विदुषःप्रतिसंप्रतियाचनांजलिरित्यलंप्रांशुम्यपुनइवपांडित्ययत्नासोलिप्सुभिःप्रपातानवलोकिभिर्वालिशनरैःसहफला
पेनेतिविरम्यते॰ ॰सभायामुपविष्टायांशिष्टानामिष्टसिद्धये॰निर्विघ्नलघिष्ठेनविशिष्टार्थाभिधायिनी॥देवस्थलीकुलोद्भूतरघुनाथेन
सूरिणा॰ऊधार्मिकतिरस्कर्त्रेपत्रीमत्रभवत्सदे॰विरच्यसातिमंदारपुष्पस्तनसमोपमा॰अर्पितापिनमत्कर्तुंस्कुजारत्नसमानवेत्ते॰बहुनात्र
किम[illegible]लोकनत्परैः॰परिभाव्यमितःसर्वैरोच्यमेषकृतोंजलिः ॥करहकजातितिरस्करणेनाराधितप्रायश्चित्तपद्य
जातिनिरसनपत्रिकासमापिता॥ ॥शिलीमुखवकपालीकमुखवत्पालल॥लतणशकालिखन्महानलिनीलदेहपदोपत्तः२॥ श्रीः॥